P: ISSN NO.: 2394-0344 RNI No.UPBIL/2016/67980 VOL-3* ISSUE-4* July- 2018
E: ISSN NO.: 2455-0817 *Remarking An Analisation*

# आत्मपरिमाणनिरूपणम्



**सुव्रत गायेन**
शोध छात्र,
दर्शनशास्त्र विभाग,
जादवपुर विश्वविद्यालय,
कोलकत्ता, पं0 बंगाल

**सारांश**

आत्मतत्त्वसाक्षात्काराद् एव निःश्रेयसम्, तस्मादात्मा किंस्वरूपकः, किं वा तस्य परिमाणम् इत्येतदवितथतथ्यजातं वैशद्येनावधेयम्। परमात्मनः परिमाणविमर्शे मिथोवावदूका धुरन्धराः पण्डितप्रवराः विद्वांसः।तथाहि रामानुजीया माध्वा वल्लभाचार्यमतानुसारिणश्च अणुपरिमाणमात्मनःवदन्ति।चार्वाका जैनाश्च मध्यमपरिमाणवान् आत्मेति मन्यन्ते। नैयायिका वैशेषिकाः सांख्याः पातञ्जला अद्वैतवेदान्तिनश्चात्मनो विभुत्वमिच्छन्तीति हि स्थितिः।बौद्धानां मते पुनः विज्ञानसन्ततिरात्मा। परमात्मपरिमाणमणुरूपं न क्वचिदपि युक्तसहमात्मनोऽणुत्वे शिरसि मे वेदना, पादेमे सुखमित्यादिशरीरयावद्घटकप्रत्येकावयवावच्छेद्यसुखदुःखद्वेषादिनिष्ठलौकिकविषयताशालिसमूहालम्बनात्मकानुभवानुपपत्तिप्रसङ्गात्। न चात्मनो देहपरिमाणरूपमध्यमपरिमाणवत्त्वमेव युक्तमिति वाच्यम्, मध्यमपरिमाणवत्त्वे आत्मनोऽनित्यत्वेन कृतहानाकृताभ्यागमदोषप्रसङ्गात।पारिशेष्यानुमानात् अन्ततश्चात्मनो विभुत्वमेवोपपत्तिमदितिशेमुषीजुषां सविमर्शः परामर्शः। परम् एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेत्। लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति न्यायात् प्रमाणादिकमपिउपन्यासनीयम् इत्यसौ निबध्यते बन्धः।

**मुख्य शब्द :** आत्मा, परिमाणम्, जैनः, चार्वाकः, मध्यमपरिमाणम्, देहपरिमाणम्, वैष्णवः, वेदान्ती, अणुपरिमाणम्, न्यायवैशेषिकाः, विभुपरिमाणम्, चेतनः, नित्यः, सर्वव्यापी, विभुः, परिणामी।

**प्रस्तावना**

सुखं मे भूयाद्, दुःखं मे मा भूदित्यस्ति जगत्याब्रह्मस्तम्बपर्यन्तं प्राणिनां समेषां निसर्गतो जायमाना प्रवृत्तिः। सुखप्राप्तये च दर्शनेषु पुरुषार्थचतुष्टयमुपदिश्यते। पुनरपि जननं पुनरपि मरणमिति जनिमृतिचक्रमतिक्रम्य परमपुरुषार्थप्राप्तिस्तस्मात् मनुजनूनां परमं चरमं च लक्ष्यम्। ननु का च तत्र सुखस्य पराकाष्ठा? मोक्षो नाम तत्सुखं परममैकान्तिकात्यन्तिकदुःखघातकं यल्लाभाय यतन्ते प्राणिनः, यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। परमपुरुषार्थः स मोक्ष आत्मसाक्षात्कारेणैव प्राप्तुं सुशकः। तथाहि श्रुतौ प्रभुसम्मित उपदेशः –'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति। अत आत्मज्ञानलाभाद्धि मोक्षः। तच्चात्मज्ञानमात्मविषयकज्ञानमिति। नन्वात्मज्ञानघटकीभूत आत्मा किंस्वरूपकः, किंगुणकश्चेतिजिज्ञासाशमनायायं बन्धो निबध्यते।

अत्र निरूपणं विचारार्थो मीमांसार्थो वा। विचारोऽयमधिकरणेऽपेक्षते सन्दिग्धत्वं सप्रयोजनत्वंच। अतो यत्र यत्र जिज्ञास्यत्वं विचार्यत्वं वेति तत्र तत्र सन्दिग्धत्वे सति सप्रयोजनत्वमिति विचार्यलक्षणं लक्षयन्ति लक्षणाभिज्ञा विपश्चित्तल्लजाः। अतः सन्दिग्धे तथा प्रयोजनीये एव विषये विचारोऽवतार्यत इत्यत्र नास्ति कोऽपि विशयो विषयेऽस्मिन् बहुश्रुतानां विवेचकानाम्। इदमेवाभिप्रेत्याब्रवीद् वाचस्पतिमिश्रस्तदीयायां भामत्याम् – ''अथ यदसन्दिग्धमप्रयोजनं न तत्प्रेक्षावत्प्रतिपित्सागोचरो यथा समनस्केन्द्रियसन्निकृष्टः स्फीतालोकमध्यवर्ती घटः करटदन्ता वा'' इति। एवमत्रापि विविधेषु दर्शनेष्वास्तिकेषु नास्तिकेष्वात्मनः परिमाणविमर्शे विबुधानां विविधानां शास्त्रानुशीलनपरिशीलितधीषणानां विद्यन्ते विवादा बहुधा। तेषां ज्ञानगर्भगीर्वारिपिच्छिलेऽध्वनि न प्रवर्तते साधारणानां मतिरिति सन्दिग्धत्वे तथा तस्य संशयस्यान्यत्र कुत्रचिन्निरासाभावदर्शनात्संशीत्युच्छित्तिरेव प्रयोजनमिति सप्रयोजनीयत्वे चायं विषय उभयविधवैशिष्ट्यावगाहित्वाद्विचार्यतामेति।

अनेन प्रारब्धस्य प्रसङ्गस्य विषयोऽपि परिष्क्रियते साधु तद्यथात्र विषयद्वयं समुपलभ्यते आत्मा, तत्परिमाणंच। तज्जिज्ञासुश्चात्राधिकारी, प्रयोजनं हि आत्मपरिमितिसंशीतिशातनम्, सम्बन्धश्च प्रतिपाद्यप्रतिपादकरूपः। ननु भवति यद्वा, विचार्यं तावदिदानीमात्मस्वरूपम्।

आत्मा हि चैतन्यस्वरूपः, स्वयंप्रकाशः। 'अत सातत्यगमने' इति गमनार्थकात्धातोर्मनिनि आत्मशब्दोऽयं निष्पन्नः। सर्वेऽपि गत्यर्था धातवो ज्ञानार्था इति नियमात् ज्ञानाधिकरणमात्मा इति फलति। लक्षणेऽधिकरणपदं समवायेन ज्ञानाश्रयत्वलाभाय, न त्वतिव्याप्तिवारणाय। ज्ञानस्याधिकरणं ज्ञानाधिकरणम्। अधिकरणपदस्याधेयतानिरूपिताधिकरणतावान् अर्थः। षष्ठ्यर्थ आधेयत्वम्। अस्य चाधेयतायामन्वयः। तथा च, ज्ञाननिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वमात्मनो लक्षणम्,

ज्ञाननिष्ठा याधेयताहं जानामीत्याकारकप्रतीतिसिद्धा ज्ञाननिष्ठाधेयता, तन्निरूपिता याधिकरणता आत्मनिष्ठाधिकरणता तदाश्रयत्वमात्मनि वर्तत इति लक्ष्ये लक्षणसमन्वयः। कालिकसम्बन्धावच्छिन्नज्ञाननिष्ठाधेयतां गुणत्वावच्छिन्नाधेयतांचादाय कालादावतिव्याप्तिवारणाय समवायसम्बन्धावच्छिन्नत्वं ज्ञानत्वावच्छिन्नत्वंच ज्ञाननिष्ठाधेयतायां विशेषणं देयम्। उत्पन्नविनष्टस्यात्मनोऽभावेन तत्रातिव्याप्तिवारणाय जातिघटितलक्षणं न कर्तव्यम्। तथा च समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नाधेयतानिरूपिताधि–करणताश्रयत्वमात्रमात्मनो निष्कृष्टं लक्षणं बोध्यम्।

वस्तुनो मानव्यवहारस्यासाधारणं कारणं गुणविशेषो हि परिमाणम्। "मानव्यवहारासाधारणकारणं परिमाणम्" इति। मानव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वमिति तदर्थः। तच्चाणुत्वमहत्त्वह्रस्वत्वदीर्घत्वभेदाच्चतुर्विधमिति वदन्ति वैशेषिकाः।परन्तु तत्र ह्रस्वत्वस्याणुत्वे तथा दीर्घत्वस्य महत्त्व एवान्तर्भावः सम्भवतीति वैशेषिकाः। नैयायिकास्तु परिमाणं त्रिविधमणुपरिमाणं महत्परिमाणं परममहत्परिमाणंचेति वदन्ति। मानव्यवहारनिष्ठा या कार्यतायमणुः, अयं महान्, अयं दीर्घः, अयं ह्रस्व इत्याकारकशब्दप्रयोगनिष्ठा कार्यता तन्निरूपितकारणताश्रयत्वमणुत्वादिपरिमाणेषु वर्तत इति लक्षणसमन्वयः। तत्र परमाणुत्वं परमाणुमनसोः, मध्यमाणुत्वं द्व्यणुके, परममहत्त्वं विभुपदार्थे, मध्यममहत्त्वं घटादौ। एवमेव ह्रस्वत्वदीर्घत्वयोरपि ज्ञेयम्।

अथात्मनः परिमाणं निरूप्यते। तत्र रामानुजीया माध्वा वल्लभाचार्यमतानुसारिणश्च जीवानामणुपरिमाणं वदन्ति। चार्वाका जैनाश्च मध्यमपरिमाणवान् आत्मेति मन्यन्ते। नैयायिका वैशेषिकाः सांख्याः पातञ्जला अद्वैतवेदान्तिनश्चात्मनो विभुत्वमिच्छन्तीति हि स्थितिः। परम् एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेत्, लक्षणप्रमाणाभ्यां वस्तुसिद्धिःइति न्यायात् प्रमाणादिकमपि उपन्यासनीयम्।

**मध्यमपरिमाणवादिनां मतम्**

तत्रादौ मध्यमपरिमाणवादिनां जैनचार्वाकाणां मतमालोच्यते। मध्यमपरिमाणं नाम देहपरिमाणम्, आत्मा देहावच्छिन्नश्च। तथाहि चार्वाकाः –

"अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः।
देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः''।।

इति। देहपरिमाणमेवात्मा। देहव्यतिरिक्तस्यात्मनोऽङ्गीकारे तु मरणसमये देहाद्बहिर्गच्छतस्तस्यादर्शनेन तस्यामूर्तत्वाङ्गीकारावश्यम्भावेन तत्र कृशत्वस्य कृष्णादिरूपस्य चासम्भवाद् अहम्पदवाच्यात्मनः कृश–कृष्णादिपदैः सामानाधिकरण्यं कृशोऽहं कृष्णोऽहमित्येवं लोकप्रसिद्धं न सम्भवतीत्यर्थः।

आर्हतदर्शनविदाचार्या अपि आत्मानं मध्यमपरिमाणवन्तमुररीकुर्वन्ति। तेषां नये मध्यमपरिमाणं शरीरसमपरिमाणमित्यर्थः। तथाहि सूत्रितं प्रमाणनयतत्त्वालोकालङ्कारसूत्रे– "चैतन्यस्वरूपः परिणामी कर्ता साक्षाद्भोक्तास्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्गलिकदृष्टवांश्चायम्'' इति।कर्मफलभोगायात्मा यच्छशरीरं यदाश्रयति, तच्छरीरसमपरिमाणावच्छिन्नः परिमाणवदात्मा तदा तदा प्रतीयते। लघ्वाकाराकारिते काये आत्मापि लघुपरिमाणस्तथैव बृहति विग्रहे विग्रहानुरूपबृहत्परिमाणवान्। अस्यायमाशयः पिपीलिकाशरीरे तच्छरीरानुरूपाकाराकारित आत्मा, पुनः मनुष्यकायेऽपि मनुष्यकाराकारित आत्मा तत्परिमाणविशिष्ट एव। एवं प्रयोजनानुसारं यस्य परिमाणस्य ह्रासप्रकाशौ, तस्यैव परिमाणस्य मध्यमत्वमङ्गीक्रियते मध्यमपरिमाणवादिभिश्चार्हतैः। परमत्रापि अवधेयं यत् मध्यमपरिमाणवादिन आत्मनोऽशंद्वयमुररीकुर्वन्ति। तत्रैकं स्वप्रकाशं स्वाभाविकनैसर्गिकरूपेणापरिवर्तितं द्रव्यम् इतरं चपरिवर्तनशीलं पर्यायात्मकम्। द्रव्यात्मकावयवस्य न भवति स्वकीयं परिमाणं, परन्तु पर्यायात्मकांश एव मध्यमपरिमाणावच्छिन्नः। परं न्यायवैशेषिकाचार्यास्तान् प्रत्यवतिष्ठन्ते एवं – अस्तु स्वीकृतमिदं भेदद्वयम्। अधुनायं प्रश्नः समुदेति अपि वा द्रव्यपर्यायेऽन्योन्याभिन्ने मिथो भिन्ने वा। यदि भिन्नं तर्हि पर्यायांशस्य सङ्कोचविकाशौ द्रव्यात्मकमवयवं न स्पृशेताम्, तथा सति सम्पूर्णतयात्मा मध्यमपरिमाण इति वक्तुं न पार्यते। यदि वाभिन्नता तयोस्तर्हि पर्यायभागस्यानित्यतया आत्मसकलस्याप्यनित्यत्वापत्तिरापद्येत।

अतो भागद्वयात्मकमिदमात्मनो मध्यमपरिमाणवत्त्वं न युक्तम्। अन्यथातु नित्यस्यात्मनोऽपि विकारादयो दोषाः सम्भवन्ति। तथा च ब्रह्मसूत्रं ''न च पर्यायादप्यविरोधो विकारादिभ्य'' इति। अपि च, आत्मनो देहपरिमाणत्वेऽङ्गीकृते देहस्य विनाशे आत्मनो विनाशः, आत्मनो विनाशे चात्मनोऽनित्यत्वापत्तिः कृतहानाकृताभ्यागमदोषोत्पत्तिश्च सुतरां समस्ति। कृतस्यैतज्जन्मार्जितस्य पापपुण्यादेर्हानो निष्फलत्वम् अकृतस्य स्वानार्जितस्य पुण्यपापफलस्यागमः प्राप्तिः, तयोरापत्तेरित्यर्थः। आत्मनो नाशानन्तरं भोक्तुरभावाज्जन्मप्रभृत्येव सुखदुःखाननुभवादिति भावः।आत्मनः शरीरपरिमाणत्वे कायविलये देहावस्थायां कृतानां कर्मणां फलभोगं विनैव नाशस्तथा कर्मकर्ता विना कर्मैव कर्मफलभोगे असहायः स्यात्। तथा सति यः कर्मकर्ता स एव हि कर्मफलभोक्तेति सार्वजनीननीतेरपि वैयर्थ्यापत्तिर्दुर्वारा। अतो लोकोपपत्तिरहितस्य प्रतिपत्तिविरुद्धस्य कृतहानाकृताभ्यागमदोषस्य परिहारायैव न्यायवैशेषिकसिद्धान्ते आत्मनो मध्यमपरिमाणवत्त्वमुपपत्त्या प्रतिषिध्यत इति न चित्रम्।

**अणुपरिमाणवादिनां मतम्**

प्रागुक्तकारणादेव वैष्णववेदान्तिनो रामानुज–मध्व–निम्बार्काद्याचार्या आत्मनो मध्यमपरिमाणवत्त्वमपवार्याणुपरिमाणवत्त्वं प्रतिपादयन्ति। ते चादौ दूषयन्ति मध्यमपरिमाणवादिनां मतम्,तथा जीवस्य देहानुरूपपरिमाणताङ्गीकारे योगबलादनेक–देहपरिग्राहकयोगिशरीरेषु प्रतिशरीरं जीवविच्छेदः प्रसज्येत। मनुजशरीरपरिमाणो जीवो मतङ्गजदेहं कृत्स्नं प्रवेष्टुं न प्रभवेत्।

किञ्च, गजादिशरीरं परित्यज्य पिपीलिकाशरीरं विशतः प्राचीनशरीरसन्निवेशविनाशोऽपि प्राप्नुयात्। न च यथा प्रदीपप्रभाविशेषः प्रपाप्रासादाद्युदरवर्तिसङ्कोचविनाशवान् तथा जीवोऽपि मनुजमतङ्गजादिशरीरेषु स्यादित्येषितव्यं प्रदीपवदेव सविकारत्वेनानित्यत्वप्राप्तौ कृतप्रणाशाकृ–ताभ्यागमप्रसङ्गात्। तथाहि योगी स्वयोगसामर्थ्येन युगपदनेकानि शरीराणि धारयन्ति। तत्र जीवस्य विभुत्वे मिथो वियुक्तेष्वप्यनेकेषु शरीरेष्वेकस्य जीवस्य सम्बन्धः सम्भवति। जीवस्य शरीरपरिमाणत्वे तु शरीराद्बहिः सम्बन्धाभावेनैकस्मिन् काय एकं जीवशकलमपरमपरत्रेति जीवविच्छेदः स्यात्। ततश्च दूषणान्तरमाह पिपीलिकाशरीरे प्रवेशात्प्राग्गजावस्थायां यादृशशरीराकारेण सन्निवेशोऽवयवरचनाविशेषस्तादृ–शाकारस्य जीवस्य पिपीलिकाशरीरे प्रवेशासम्भवेन पूर्वकायस्य विनाशः कल्पनीयः। यद्यपि मनुष्यशरीरगतो जीवस्तद्देहावसाने मतङ्गजशरीरप्राप्तौ विकशितावयवः स एव पिपीलिकाशरीरप्राप्तौ सङ्कुचितावयव इत्येक एव जीवस्तथापि

सङ्कोचविकाशानामुत्पत्तिविनाशव्यक्तत्वेनकदाचिदुत्पत्तिर्विनाशश्च तस्यावश्यक इति विकारतापि तस्यात्मनः सङ्गच्छत इति हेयः पूर्वपक्षो मध्यमपरिमाणवादी। एवं पूर्वपक्षं निरोध्यात्मनोऽणुपरिमाणं मन्यमाना वैष्णववेदान्तिन आचार्याः स्वपक्षे श्रुतिं प्रदर्शयन्ति। तथाहि मुण्डकोपनिषद्याम्नातम् –

"एषोऽणुरात्मा चेतसा वेदितव्यः" इति। अपि च काठके –"न हि सुविज्ञेयोऽणुरेष धर्मः" , "अणीयान् ह्यतर्क्यमणुप्रमाणात्" , "प्रवृह्य धर्म्यमणुमेतमाप्य" इति च । श्वेताश्वतरोपनिषदि समाम्नातम् –"आराग्रमात्रः पुरुषः" इति। अपि च,

"बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते।।" इति।

अन्तिमेऽस्मिन् श्रुतिवाक्ये केशाग्रभागस्य शतांशस्यापि शतांशतमं परिमाणमणुपरिमाणमात्मनः श्रुत्यैवोपदिश्यते। तथाहि अभ्यङ्करटीकायामाटीकितम् –

"बालः केशः तस्याग्रादुद्धृतः शततमो भागस्तस्मादप्युद्धृतो यः शततमो भागस्तत्तुल्यो विज्ञेयः। स चेदृश एवानप्रत्याय मोक्षाय प्रभवतीत्यर्थः।" इति। एतेभ्यः श्रौतवचनेभ्य एवाणुत्वमात्मनः प्रतिपाद्यते रामानुजादिभिराचार्यैः।

अणुत्वं नाम सूक्ष्मत्वं निरवयवत्वं विरलावयवत्वं वा। तथाहि उच्यते –

"जालसूर्यमरीचिस्थं सूक्ष्मं यद्दृश्यते रजः।
तस्य सूक्ष्मतमो भागः परमाणुः स उच्यते।।" इति।

परं तत्रापि न्यायवैशेषिकाः कटाक्षायन्ते। तेषां नये आत्मनोऽणुपरिमाणत्वेस्वीकृते शरीरैकदेशव्यापित्वं सङ्गच्छते। यत आत्माणुपरिमाणो जीवस्य विग्रहं समग्रं व्याप्य स्थातुं नैव शक्नोति क्वचिदपि अतः शरीरैकदेश एवात्मविशेषगुणानां सुखदुःखानामुपलब्धिः कल्पनीया। परं नैतत्सम्भवति, शिशिरर्तौ शीतलसमीरणे वाति शैत्यानुभवः समग्रस्यैव देहस्य भवति। तेन नात्मा शरीरैकदेशवर्ती। न वाणुपरिमाण इति सिद्ध्यति। अपि च, अस्मन्मते तुअणुपरिमाणविशिष्टं द्रव्यमतीन्द्रियं, अणुपरिमाणविशिष्टस्य द्रव्यस्य गुणा अपि अतीन्द्रियाः। अत आत्मविशेषगुणानां सुखदुःखादीनामतीन्द्रियत्वे मानसं प्रत्यक्षं तेषां न सम्भवतीति न्यायवैशेषिकाचार्या आत्मनोऽणुपरिमाणवत्त्वं नोररीकुर्वन्ति इति भवितुमर्हति। यद्वा, तेषां नये आत्मनोऽणुत्वं न स्वरूपतः किन्तु द्रष्टृधीनैर्मल्याभावात्। तथाहि ब्रह्मसूत्रम् –"तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" इति । श्रुतिरपि शास्ति–"बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः" इति ।

एवं न्यायवैशेषिकनये आत्मा नाणुपरिमाणः, नापि मध्यमपरिमाणः।

## विभुपरिमाणवादिनां मतम्

न्यायवैशेषिकदर्शनेऽणुमध्यमपरिमाणस्वीकृति–तिरस्कृत्या विभुपरिमाणवत्त्वमुपपत्त्योपपादितम्। एतेषां प्रमाणविदामाचार्याणां नये परमाणुत्वे सर्वशरीरावच्छेदेन सुखाद्यनुपलब्धिप्रसङ्गात्, मध्यमपरिमाणवत्त्वे अनित्यत्वापत्तेस्तथा कृतप्रणाशाकृताभ्यागमप्रसङ्गादात्मा विभुः परममहत्परिमाणवान्। ननु किं नाम विभुत्वम् ? सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। अपि च,विभुत्वं परममहत्त्वमिति। मूर्तत्वं नाम परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा। सर्वाः पृथिव्यः, सर्वा आपः, सर्वाणि तेजांसि, वायवः सर्वे, सर्वाणि च मनांसि, तत्संयोगित्वमात्मनि वर्तत इति लक्षणसमन्वयः। आत्मनः परममहत्त्वे स्वीकृते एकस्मिन्नेव क्षणे सकलमूर्तद्रव्यसंयोगित्वं युगपत्तस्य सम्भवति। अतो विभुरात्मा सर्वगतः सर्वव्यापी। तथाहि परममहत्परिमाणवादिनः श्रुतिवचनमुदाहरन्ति –"महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम्" इति। अपि च, "महान्तं विभुमात्मानं मत्वा धीरो न शोचति" इति । गीतायामपि गीतं भगवता –

"नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।" इति।

आत्मविभुत्वप्रतिपिपादयिषया भाषापरिच्छेदे –"कालखात्मदिशां सर्वगतत्वं परमं महत्" इति कारिकाया मुक्तावल्यामुक्तं कालाकाशात्मदिशां सर्वगतत्वं परममहत्त्वं च साधर्म्यम्। सर्वगतत्वं सर्वमूर्तसंयोगित्वम्। परममहत्त्वत्वं जातिविशेषोऽपकर्षानाश्रयपरिमाणत्वं वा। इति।

## विभुत्वाङ्गीकारे मानम्

नन्वात्मनो विभुत्वे किं प्रयोजनं किं वा प्रयोजनमस्य सकलमूर्तद्रव्यसंयोगित्वे व्यापकत्वे वा इति चेदुच्यते नैयायिकैर्वैशेषिकैश्च जगत्यस्मिन् सर्वत्रैवात्मनः कार्यस्योपलब्धिरस्मदादीनां भवति, अत आत्मा सर्वव्यापी, आत्मकार्यं च द्वेधा निष्पाद्यते स्वीयप्रयत्नेनादृष्टेनच। कुम्भकारः कुम्भं निर्माति तन्तुवायः तन्तुभ्यस्तनोति पटावयवम्। एवं सर्वत्रैवात्र घटपटादिकार्ये कुम्भकारशरीरावच्छिन्न आत्मा तत्कर्तृरूपेणावतिष्ठते। नन्वेवं सति शरीरपरिमाणत्वमेव स्वीक्रियतां, किं नाम विभुपरिमाणाभ्युपगमेनेति चेन्नात्मनः अदृष्टद्वारक–कार्योत्पादनासम्भवात्।

आत्मायथाकर्तृरूपेण स्वयं वर्तमानः स्वप्रयत्नेन कार्यं साधयति तथैव यानि कार्याणि आत्मा प्रयत्नेन नोत्पादयति, तत्कृतिसिद्धौ आत्मनोऽदृष्टमपेक्षते। एतादृशे कार्ये आत्मनः शारीरिकी उपस्थितिरनावश्यिकी। यथास्त्येतादृशं वस्तुजातम् अगण्यं येषामुत्पादनमस्मदादिभिः प्रयत्नेन न साधितम्, परं तानि अस्मत्प्रयोजनेषु अस्मदादिभोग्यतां यान्ति। यथेश्वरप्रयत्नेन मेघो जलं वर्षति, परं यद्यप्यत्रास्मदादिप्रयत्नो न परिलक्ष्यते तथाप्यदृष्टं तु अस्ति एव। अन्यथा कथं तेन अस्मच्छरीरं शीतलतां सरसतां चाभ्युपैति। यद्वा मुर्शिदावादप्रदेशे उत्पन्नम् आम्रमपि मत्प्रयत्नेन विनैव मददृष्टजन्यम् इति ग्राह्यम्। अन्यथा कथं तद् वेलुडमठप्रदेशस्य कस्यचित्तृप्तिसाधनं भवेत्। अत आत्मा स्वीयप्रयत्नेनादृष्ट्या च कार्याणि निष्पादयन्तीति नास्त्यत्र विचिकित्सा कुत्रचित्। सुखदुःखादि एव अदृष्टपदवाच्यम्। एवमदृष्टं ह्यात्मनो गुणः। ते च सुखदुःखाद्यात्मविशेषगुणाअयुतसिद्धत्वादात्माश्रिता एव। अत आत्मा एकत्र वसति, अदृष्टंचान्यत्र वसत्कार्यमुत्पादयेदिति न वक्तुं शक्यत इत्यात्मनो विभुत्वे व्यापकत्वे च स्वीकृते सुदूरवर्ती आत्मा विभुः सर्वव्यापी युगपद् विविधेषु स्थलेषु एकस्मिन्नेव काले समवेतः सन् कार्यमदृष्टेन प्रयत्नेन चोत्पादयितुं शक्नोतीत्यभ्युपगन्तव्यम्।एवं न्यायवैशेषिकशास्त्रविदाचार्यैः आत्मनः परममहत्त्वमुपपत्त्या उपपादितम्।

पूर्वपक्षीयैराक्षिप्यते यत् परममहत्परिमाणवदात्मा यदि सर्वव्यापकस्तदा समेषामेव चैत्रमैत्रादीनामप्यदृष्टमपि सर्वव्यापि आत्मविशेषगुणत्वात्, तेन यदाम्रं मत्तृप्तिसाधनं तत्र मददृष्टेन सममेषां समेषामदृष्टानामपि तत्र स्थितेस्तानि तान्यदृष्टान्यपि मदभीष्टसाधने कारणतां प्राप्नुयुः। तथा सति कथम् आम्रम्मददृष्टजनकमित्युक्त्वा मयैव भुज्यते, न तैश्चैत्रमैत्रादिभिरिति शङ्कायां समादधति न्यायवैशेषिका एवं कार्यनियतपूर्ववृत्तित्वे एव न कारणता, कार्योत्पत्तावुपयोगित्वमपि नितरामपेक्षते। अतस्तत्रापि सत्स्वपि बहुष्वदृ–ष्टेष्वनपेक्षणीयत्वादनुपयोगित्वाच्च न तेषां कारणत्वं समस्ति। अन्यान्यदृष्टानि तु तत्रान्यथासिद्धानि।तेनानन्यथासिद्धानां तथा नियतपूर्ववर्तिनामेवात्र कारणतेति न विभुत्ववैयर्थ्यापत्तिः।

तथाप्यपरः कश्चिदाक्षिपति आत्मा यदि सर्वव्यापी विभुपरिमाणस्तर्हि कथं पुनरात्मनःपरलोकादिगमनं सम्भवति

तत्रापि नाकनरकादावपि व्याप्यत्वादात्मनः। न हि यस्मिन् स्थाने यद्विद्यमानं तत्रैव स गन्तुं शक्नोति। सिंहासनारूढश्चैत्रः न पुनः सिंहासनं गन्तुं पारयति। गमनं नाम पूर्वस्थानसंयोगच्छेदे उत्तरदेशसंयोगानुकूलव्यापारः। परं सर्वव्यापिन आत्मनो न पूर्वदेशसंयोगविच्छेदो न वोत्तरदेशसंयोगः।अतः किं तर्हि आत्मनो विभुत्वमसमञ्जसम्। अत्रापि न्यायवैशेषिकाः पूर्वपक्षाशङ्कां समादधत्येवम्–परलोकगमनं हि स्वीयादृष्टेनोत्पन्ननवीनशरीरेण प्रथमसंयोगः। तेन शंकानाशः एव । तथाहि अस्मन्मते एष एव पक्षः युक्तिसहःयतोहि विविधकार्यस्यानुष्ठाने अपूर्वमुत्पद्यते, तच्चापूर्वमदृष्टेनकृतकर्मफलभोगाय नवीनं शरीरं निर्माति, परलोकगमनं हि तेन शरीरेणात्मनः संयोगः। विभुरात्मा परलोके विद्यमानोऽपि शरीराभावाच्छरीरसंयोगरहितः, ततश्च फलभोगनिमित्तं शरीरे उत्पन्ने आत्मा तत्र संयुज्यते। अत आत्मनो व्यापकत्वेऽपि नास्ति परलोकगमनरूपनूतनशरीरसंयोगे बाधकता क्वचित्। तथाहि न्यायसूत्रं–"शरीरोत्पत्तिर्निमित्तवत् संयोगोत्पत्तिर्निमित्तं कर्म"इति। अतो विभुरात्मा। जीवस्याणुत्वमध्यमत्वानित्यत्वानाम् असम्भवाज्जीवो विभुर्नित्यो नित्यत्वपरममहत्त्वोभयाश्रय इत्यर्थः। तस्मात् न्यायनयानुसारं विभुत्वमात्मनः परिमाणं ग्राह्यमिति मदीया मतिः।

बौद्धानां मते विज्ञानसन्ततिरात्मा। परं विज्ञानं हि गुणभूतमिति न तस्य स्वातन्त्र्येण किञ्चिदपि परिमाणं वक्तुं शक्यते। न आश्रयानुरोधेनापि तस्य परिमाणं वक्तुं शक्यम् आश्रयस्याभावात्। अतो विज्ञानवादिबौद्धानामात्मविषयकोऽयं राद्धान्तो भ्रामको भ्रान्तिमान् चेति न दार्शनिकानामगोचरः।

**उपसंहृतिः**

उपसंहृतावेतदुद्यं यदात्मपरिमाणमणुरूपं न क्वचिदपि युक्तसहमात्मनोऽणुत्वे शिरसि मे वेदना, पादे मे सुखमित्यादिशरीरयावदवघटकप्रत्येकावयवावच्छेद्य–सुखदुःखद्वेष ादिनिष्ठलौकिकविषयताशालिसमूहालम्बना–त्मकानुभवानुपपत्तिप्र सङ्गात्। न चात्मनो देहपरिमाणरूपमध्यमपरिमाणवत्त्वमेव युक्तमिति वाच्यम् मध्यमपरिमाणवत्त्वे आत्मनोऽनित्यत्वेन कृ तहानाकृ–ताभ्यागमदोषप्रसङ्गात्। पारिशेष्यानुमानात् अन्ततश्चात्मनो विभुत्वमेवोपपत्तिमदिति शेमुषीजुषां सविमर्शः परामर्शः।तत्रापि च वैदान्तिक–तार्किकयोर्विभुत्वेऽपि भेदः। यथा वेदान्तनये विभुर्नाम सर्वव्यापित्वम्। आत्मा हि सर्वव्यापी विभुत्वात्। जगति सर्वत्रात्मा व्याप्तोऽनुस्यूतश्च। घटपटमठादयस्तत्र सर्व एवात्मस्वरूपाः। परं न्यायवैशेषिकदर्शने विभुत्वं हि मूर्तद्रव्यसंयोगित्वम्। ये च महत्परिमाणवन्तस्त एव मूर्ताः पृथिव्यादयः, अतस्तैः मूर्तैः संयोगसत्त्वे सति व्यापित्वं विभुत्वम्। तेन घटपटमठादयो नात्मानः। परं तेषु पार्थिवद्रव्येषु मूर्तेषु यस्य संयोगो वर्तते स एव विभुपरिमाणवान् आत्मा। ननु संयोगस्याव्याप्यवृत्तित्वनियमाद् सर्वमूर्तद्रव्यसंयोगिनोर्विभोरपि संयोगस्याव्याप्यत्वेन न नैयायिकस्वीकृतविभोः सर्वद्रव्यानुस्यूतत्वम्। परं सत्स्वपि विभुवादिभेदेषु पयसामर्णव इव विभुवादिनामपि विविधोपायैरात्मनो विभुत्वमेव परमं लक्ष्यम् इत्युपमामुखेन यथा रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां नृणामेको गम्यः पयसामर्णव इव इत्यलमतिपल्लवितेनेति शिवम्।

**ग्रन्थग्रामर्णम्**


1. *काठकोपनिषद्, ब्रह्मचारि–मेधाचैतन्यसम्पादिता, आद्यपीठ–बालकाश्रमः, कलिकाता, पुनर्मुद्रापितम्, 2010*
2. *तर्कसंग्रहः(नवटीकोपेतः), सात्करिशिर्मसम्पादितः, चौखम्भा संस्कृत संस्थान, वाराणसी, चतुर्थसंस्करणम् 2004*
3. *तर्कसंग्रहः (अध्यापनासहितः), नारायणचन्द्रगोस्वामिसम्पादितः, संस्कृतपुस्तकभाण्डारः, कलिकाता,1404बङ्गाब्दः*
4. *तर्कभाषा (प्रथमखण्डात्मिका), गङ्गाधरकरसम्पादिता, महोबोधि बुक् एजेन्सी, कलिकाता, 2009*
5. *तर्कभाषा (द्वितीयखण्डात्मिका), गङ्गाधरकरसम्पादिता, महोबोधि बुक् एजेन्सी, कलिकाता, 2009*
6. *न्यायदर्शनम् (प्रथमखण्डात्मकम्), फणिभूषणतर्कवागीशसम्पादितम्,पश्चिमबङ्गराज्यपुस्तकपर्षत् द्वितीयसंस्करणम्,1999*
7. *न्यायपरिचयः, फणिभूषणतर्कवागीशसम्पादितम्, पश्चिमबङ्गराज्यपुस्तकपर्षत् द्वितीयसंस्करणम्,1999*
8. *ब्रह्मसूत्रशाङ्करभाष्यम्, महादेवशर्मसम्पादितम्, निर्णयसागरः, मुम्बई, 1934.*
9. *भाषापरिच्छेदः, पञ्चाननशास्त्रिसम्पादितः, कलिकाता, 1884*
10. *भाषापरिच्छेदः, अनामिकारायसम्पादितः, संस्कृ त–पुस्तकभाण्डारः, कलिकाता, 2008*
11. *व्यासदर्शन, श्रीमत्स्वामिविद्यारण्य, वर्धमानविश्वविद्यालयः, वर्धमान, 1988*
12. *विवेकचूडामणिः, शम्भुनाथपाठकानूदितः,गीताप्रेस,गोरक्षपुरम् 2003*
13. *वेदान्तसारः, कर्णेल जी. ए. जेकब दृसम्पादितः, कृ –ष्णदास अकादमी, वाराणसी,*
14. *सायणमाधवीयसर्वदर्शसंग्रहः (प्रथमखण्डः), श्रीसत्यज्योतिचक्रवर्तिसम्पादितः, साहित्यश्रीः, कलिकाता, 1391वङ्गाब्दः*
15. *सायणमाधवीयसर्वदर्शसंग्रहः (द्वितीयखण्डः), श्रीसत्यज्योतिचक्रवर्तिसम्पादितः, साहित्यश्रीः, कलिकाता, 1391वङ्गाब्दः*
16. *सांख्यतत्त्वकौमुदी, नारायणचन्द्रगोस्वामिसम्पादिता,संस्कृत –पुस्तकभाण्डारः, कलिकाता, 1406वङ्गाब्दः*
17. *सांख्यकारिका,पूर्णचन्द्रवेदान्तचुञ्चुसम्पादिता,पश्चिम वङ्गराज्यपुस्तकपर्षत् कलिकाता*
18. *Sarvadarshanasamgraha of Sayana-Madhava, Tr. EB Cowell, AB Gough, Bharatiya Kala Prakashana, New Delhi, 2008*


**पादटिप्पणी**

1. *भामत्यां, 1.1.1.ब्रह्मसूत्रस्थस्य भाष्यस्य*
2. *नवटीकोपेते तर्कसंग्रहे 19 पृष्ठाङ्के*
3. *नवटीकोपेते तर्कसंग्रहे 28पृष्ठाङ्के*
4. *सर्वदर्शनसंग्रहे7पृष्ठाङ्के*
5. *प्रमाणनयतत्त्वालोकालङ्कारसूत्रे 56पृष्ठाङ्के*
6. *2.2.35ब्रह्मसूत्रम्*
7. *सर्वदर्शनसंग्रहे रामानुजदर्शने 28पृष्ठाङ्के*
8. *मुण्डकोपनिषदि 3.1.9*
9. *काठके 1.1.21*
10. *तत्रैव 1.2.8*
11. *तत्रैव 1.2.13*
12. *श्वेताश्वतरोपनिषदि 5.8*
13. *तत्रैव 5.9*
14. *सर्वदर्शनसंग्रहे रामानुजदर्शने 34पृष्ठाङ्के*
15. *2.3.29 ब्रह्मसूत्रम्*
16. *काठके 1.2.20*
17. *तत्रैव 1.2.22*
18. *गीतायां 2.24*
19. *3.2.66 न्यायसूत्रम्*